शोध मंथन, Impact Factor 6.726 (SJIF), UGC No. 40908 ISSN: (P): 0976-5255 (e): 2454-339X
Vol. X, No.II, pp (543-552) April - June 2019 

# महाभारतेसुभाषितेषुस्त्रियः

**कपिल जानी**
*शोध छात्र, संस्कृत विभाग,*

**डॉ0 मधुबाला शर्मा**
*शोध निदेशिका*

*महाराज विनायक ग्लोबल विश्वविद्यालय, जयपुर, राजस्थान*
*ई–मेल kapni90@gmail-com*

## सारांश

महाभारतम् एकं तादृशं महाकाव्यं यस्मिन् बहुविधानिरत्नानिप्राप्तुं शक्यते। धर्मम्, नीतिः, आचारः तथाव्यवहारादिसर्वेषांतत्त्वानांसमुद्रम् अस्तिइदंमहाभारतम्। महाभारते स्त्रीणाम् एकं महत्पदम् अस्ति। यत् ध्रुवपदवत् स्थिरंपरञ्च सदैवप्रतिष्ठितम् अस्ति। कार्तव्याकर्तव्ययोः बोधः, स्त्रीणाम् अधिकारः परञ्च तासांमहिमासहितानांसुभाषितानां सङ्कलनं महर्षिवेदव्यासेन यथार्थरूपेण कृतम् अस्ति। स्त्रीणांमर्यादाः, अधिकाराणि, कर्तव्यादिनांदर्षनं वा निर्देशंकरोतिमहाभारतम्। वर्तमानकालिकाः स्त्रियः स्वतंत्रतायाः गर्वेणस्वच्छन्देनग्रसिताः, एताः स्वपरिवारम्, समाजम् उतकुलम् नाशयन्ति। इमाः मर्यादाः, कर्तव्यानि, धर्माणि, आचरणानि, व्यवहाराणिअपरञ्च स्त्रीणांहृदयगम्यानुकरणभावान् अस्मिन् पत्रे प्रस्तूयते।

## प्रस्तावना

**रामायणं महाकाव्यंमहाभारतमेवच।**
**उभे च विश्वविख्यातेसंस्कृतस्य महानिधी।।**

रामायणंमहाभारतञ्च उभेमहाकाव्येस्तः। तेविश्वविख्यातेअपिस्तः, तस्मात् संस्कृतस्य वैशिष्ट्यम् अपिअस्तिइतिवक्तुं शक्यते। एका लोकोक्तिः अपिश्रूयते दृ यद् महाभारतेअस्तितद् सर्वत्र अस्ति, यद् महाभारतेनास्तितद् अन्यत्र नास्ति।

**यदिहस्तितदन्यत्र यन्नेहास्ति न तद् क्वचित्।**

**महाभारतम्.आदिपर्वम्.62/53**

महाभारतम् कदाचित् 'जयः', कदाचित् 'भारतम' कदाचित् 'महाभारतम्' एभिः नामभिः आख्यायते। गणेशेनलिखितम् इदम्, व्यासेनरचितम् इदम्, त्रिवर्षपरिमितकालेनलिखितम् अस्य फलम् अष्टादशपर्वैः भूषितम्, एकलक्षाधिकश्लोकेन अलङ्कृतम्, श्रीकृष्णार्जुनयुधिष्ठिरभीमनकुल–सहदेवदुर्योधनदानवीरकर्णभीष्मपितामहगुरुद्रोणाचार्याश्वत्थामासतिद्रौपदीगान्धारीसौभाग्यवतीकुन्त्यादयः रत्नतुल्यैः पात्रैः सहितम् इदंमहाभारतंसमुद्रवत् अस्ति। यस्मिन् धर्मम्, ज्ञानम्, तपः, आचारः, व्यवहारः, नीतिः, स्थित्यादयः गुणाः तेषांसर्वेषांगुणानाम् इदंमहाभारतम् निधिः वर्तते। अस्याः निधेः बहुमूल्यंरत्नम् अस्ति स्त्री। सामाजिकाः जनाः महाभारतस्य युद्धं स्त्रीजन्यम् अस्तिइतिस्विकुर्वन्ति, परन्तुतादृशं

किमपिनास्ति। किन्तुस्त्रियः कारणेन एव महाभारतस्य युद्धं विरामंप्राप्तम् इतिसत्यम् अस्ति। स्त्रियः धार्मिकाः, शीलवत्यः, सदाचारयुक्ताश्चभवन्तिस्म। स्त्रियः महाभारतकालात् पूर्वम् एव आदरणीयाः आसन् इदानीन्तमेकालेअपि–श्रिय एताः स्त्रियो नाम सत्कार्याभूतिमिच्छता।

एताः स्त्रियः आदरभावंप्राप्नोतितस्य कारणम् अस्ति–तासांतपः. पतिव्रतायाः पालनम् अर्थात् स्वपतिंसर्वस्वंस्वीकरणीयम् इतिभावोअस्ति। एतासां शक्तिनां(स्त्रीणां) विषयेमहाभारतेसुभाषितानिसन्ति। तेषांसुभाषितानाम् अत्र सङ्कलनं क्रियते। भाषितम् अर्थात् उक्तंवचनम्, अत्र यदासुइत्यस्य प्रयोगोभवतितदाअस्य शब्दस्य महत्वं एधते। सुन्दरतयाउक्तंवचनंतस्य वचनस्य शब्दसमुहं वा अंशभागंसुभाषितम् इतिनाम्नाअभिधीयते। सुभाषितंप्रायशः श्रेयस्करम्, रुचिकरम्, वा क्षेमकरम् एव भवति। संसारमिदंविषमयस्य वृक्षस्य समानम् अस्ति, यस्योऽपरि द्वे अमृततुल्येफलेप्राप्तुं शक्येते। तत्र प्रथमंमधुरंप्रियवचनंसुभाषितम् परञ्च सज्जनानां सङ्गतिः।

संसारकूटवृक्षस्य द्वे फलेअमृतोपमे।
सुभाषितञ्चसुस्वादुसङ्गतिः सुजनेजनेः।।

चाणक्यनीति.16/18

महाभारतेसुभाषितेषुस्त्रियः–

साभार्या या गृहे दक्षा साभार्या या प्रजावती।
साभार्या या पतिप्राणासाभार्यासापतिव्रता।।

महाभारतम्. आदिपर्वम्.74/40

पत्नीअर्थात् यागृहकार्ये दक्षा भवति, प्रजायाः पालनेअपिनिपुणाभवति, पत्युः कृतेप्राणवत् या प्रियाभवतिसा एव पतिव्रताभार्याइतिकथ्यते।

अर्धभार्यामनुष्यस्य भार्याश्रेष्ठतमः सखा।
भार्यामूलं त्रिवर्गस्य भार्यामूलंतरिष्यतः।।

महाभारतम्.आदिपर्वम्.74/41

संसारेऽस्मिन् स्त्री पुरुषस्य अभिन्नम् अङ्गम् अस्ति। स्त्री उत्तमसखा अपिअस्ति। स्त्री एव धर्मार्थकामादिनांमूलम् अस्तिपरंसंसाररूपंसागरंतरणाय नौकावत् साधनरूपाइयं स्त्री वर्तते।

भार्यावन्तः क्रियावन्तः सभार्यागृहमेधिनः।
भार्यावन्तः प्रमोदन्तेभार्यावन्तः श्रियान्विताः।।

महाभारतम्.आदिपर्वम्.74/42

यस्य पुरुषस्य पत्नीअस्तिसैवपुरूषः यज्ञाधिकारी वा धर्माधिकारीअस्ति। यस्य पत्युः पत्नीअस्तिसैव यथार्थरूपेणगृहस्थीकथ्यते। यः पत्नीवान् पुरुषः सैवसुखीतथाप्रसन्नः भवति। पुरुषः पत्नीप्राप्तेसति एव पुरुषस्य कृतेश्रियः सम्पन्नताप्राप्यते।

साभार्या या गृहे दक्षा साभार्या या प्रजावती।
साभार्या या पतिप्राणासाभार्यासापतिव्रता।।

महाभारतम्.आदिपर्वम्.74 / 40

पत्नीअर्थात् यागृहकार्ये दक्षा भवति, प्रजायाः पालनेअपिनिपुणाभवति, पत्युः कृतेप्राणवत् या प्रियाभवतिसा एव पतिव्रताभार्याइतिकथ्यते।

अर्धभार्यामनुष्यस्य भार्याश्रेष्ठतमः सखा।
भार्यामूलं त्रिवर्गस्य भार्यामूलंतरिष्यतः।।

महाभारतम्.आदिपर्वम्.74 / 41

संसारेऽस्मिन् स्त्री पुरुषस्य अभिन्नम् अङ्गम् अस्ति। स्त्री उत्तमसखा अपिअस्ति। स्त्री एव धर्मार्थकामादिनांमूलम् अस्तिपरंसंसाररूपंसागरंतरणाय नौकावत् साधनरूपाइयं स्त्री वर्तते।

भार्यावन्तः क्रियावन्तः सभार्यागृहमेधिनः।
भार्यावन्तः प्रमोदन्तेभार्यावन्तः श्रियान्विताः।।

महाभारतम्.आदिपर्वम्.74 / 42

यस्य पुरुषस्य पत्नीअस्तिसैवपुरूषः यज्ञाधिकारी वा धर्माधिकारीअस्ति। यस्य पत्युः पत्नीअस्तिसैव यथार्थरूपेणगृहस्थीकथ्यते। यः पत्नीवान् पुरुषः सैवसुखीतथाप्रसन्नः भवति। पुरुषः पत्नीप्राप्तेसति एव पुरुषस्य कृतेश्रियः सम्पन्नताप्राप्यते।

सखाय प्रतिविलेषुभवन्त्येताः प्रियंवदाः।
पितरोधर्मकार्येशुभवन्त्यार्तस्य मातरः।।

महाभारतम्.आदिपर्वम्.74 / 43

एकान्तस्थले या प्रियवचनानिवदन्तिसा स्त्री एन मित्रस्वरूपाअस्ति, धर्मकार्येशुपितृवत् कल्याणम् इच्छतिपरं सङ्कटकाले मातृवत् कष्टनाशिनीसा स्त्री वर्तते।

संसरन्तमपिप्रेतंविषमेश्वेकपातिनम्।
भार्यावान्वेतिभर्तारंसततं या पतिव्रता।।

महाभारतम्.आदिपर्वम्.74 / 45

स्वपतिः संसारे यत्र कुत्रापिभवेत्, पत्युः मृतः वा नरकादिलोकेतस्य वासः स्यात्, परन्तु या स्त्री तस्य पत्युः अनुगमनंकरोतिसा एव यथार्थरूपेणपत्नीअस्ति।

त्रय एवाधनाराजन् भार्यादासस्तथासुतः।
यत् तेसमधिगच्छन्ति यस्यैतेतस्य तद् धनम्।।

महाभारतम्.आदिपर्वम्.82 / 22

सेवकः, पत्नीतथापुत्रः एतेधनस्य अधिकारीणः न भवन्ति। एते यस्य सहायेननिवासं वा जीवनंव्यापयतिसैवधनस्य अधिकारीअस्ति। यथा दृ सेवकस्य धनस्य अधिकारी श्रीमन्तः(स्वामि), पुत्रस्य धनस्य अधिकारीपितातथापत्न्याः समीपे यत् धनंभवतितस्य अधिकारीतस्याः पतिः भवति।

इष्टानिचाप्यपत्यानिद्रव्याणिसुहृदः प्रियाः।
आपद्धर्मप्रमोक्षाय भार्याचापिसतांमतम्।।

महाभारतम्.आदिपर्वम्.157/26

आपद्धर्मात् यः जनः मुक्तिम् इच्छतितस्य जनस्य कृतेपुत्रः, धनम्, मित्रं तथापत्निः एतेसर्वे वाञ्छनीयाः नाम लाभकराः सन्ति।

आपदर्थेधनंरक्षेद् दारान् रक्षेत् धनैरपि।
आत्मानंसततंरक्षेद् दारैरपिधनैरपि।।

महाभारतम्.आदिपर्वम्.157/27

दृष्टादृष्टफलार्थं हिभार्यापुत्रोधनंगृहम्।
सर्वमेतद् विधातव्यंबुधानामेशनिश्चयः।।

महाभारतम्.आदिपर्वम्.157/27

लौकिकंतथाअलौकिकंलाभः यदा यः जनः इच्छति, तस्य जनस्य कृतेपत्नी,पुत्रः,धनम् तथागृहम् एतेषांसर्वेषां रक्षणंविधातव्यम्।

गुरोहिवचनंहिप्राहुर्धर्म्यंधर्मज्ञसत्तम।
गुरुणांचैवसर्वेषांमातापरमेकोगुणः।।

महाभारतम्.आदिपर्वम्.195/16

गुरोः वचनम् एवश्रेष्ठतमम् अस्तिइतिधर्मज्ञजनानांमतम्। सर्वेषुपथदर्शकेषुगुरुः श्रेष्ठः, गुरुषुअपिमातासर्वोत्तमाविद्यते।

द्रव्यार्थस्पर्शसंयोगे या प्रीतिरुपजायते।
स कामश्चित्तसंकल्पः शरीरंनास्य दृश्यते।।

महाभारतम्.वनपर्वम्.33/30

स्त्री, माता, चन्दनम्, द्रव्यस्पर्शः, सुवर्णम् तथाधनस्य संसर्गेणमनः प्रसन्नः जायतेपरंकामनायाः उत्पत्तिः अपिजायतेतथातस्य कामनायाः पूर्तिः अपिभवति।

न चभार्यासमंकिंचिद् विद्यतेभिषणांमतम्।
औषधंसर्वदुःखेषुसत्यमेतद् ब्रवीमेते।।

महाभारतम्.वनपर्वम्.61/29

चिकित्सकानांमतमिदम् यत्–सर्वदुःखानां शान्तिः उतसर्वेषांकष्टानांनिवारणंपत्नीनामकम् औशधेनसंभवम् अस्ति, इदम् सत्यम् अस्ति।

मान्याहिगुरवः सर्वे एक पत्न्यस्तथास्त्रियः।
पतिव्रतानां शुश्रूषादुष्कराप्रतिभातिमे।।

महाभारतम्.वनपर्वम्.205/5

पतिव्रताः याः स्त्रियः सन्ति, याः यथाविधिस्वपत्युः सेवांकरोतितथैवनान्यैः सेवाकार्यं विधीयते। सर्वेगुरवः तथापतिव्रतास्त्रियः सर्वेसदैवआदरणीयाः भवन्ति।

मातापित्रोश्च शुश्रूषा स्त्रीणांभर्तरि च द्विज।

स्त्रीणांधर्मात् सुधोराद्धि नान्यंपश्यामिदुष्करः।।

महाभारतम्.वनपर्वम्.205/8

पुत्रैः मातापितरौसेवा, स्त्रियापत्युः सेवाअतीवकठीनंकार्यम् अस्ति। अस्य अपेक्षया न कोऽपिउत्तमंधर्मम्।

नैव यज्ञक्रियाः काश्चिन्नश्राद्धं नोपतासकम्।
यातुभर्तरि शुश्रूषातया स्वर्गं जयत्युत।।

महाभारतम्.वनपर्वम्.205/23

स्त्रीणांभर्तुः सेवाहिस्वर्गप्राप्तेः साधनमस्ति, सेवयाहिस्त्रियः सर्वत्र जयंप्राप्नुवन्तिनैवव्रतेन वा यज्ञकर्मणा वा श्राद्धकर्मणासास्वर्गप्राप्तिंकुर्वन्ति।

पञ्चैवगुरवोब्रह्मन् पुरुषस्य बुभूषतः।
पितामाताग्निरात्मा च गुरुश्चद्विजसत्तम।।

महाभारतम्.वनपर्वम्.214/27

यःउन्नतिमिच्छतितस्य कृतेमाता, पिता, अग्निः, परमात्मा व गुरू इतिपञ्जजनाः श्रेष्ठाः भवन्ति।

न कामयेभर्तुविनाकृतासुखम्,
न कामयेभर्तुविनाकृता द्विषम्।
न कामयेभर्तुविनाकृतासुखम्,
न भर्तुहीनाव्यवसामिजीवितुम्।।

महाभारतम्.वनपर्वम्.297/53

यापतिव्रता स्त्री भवति, तस्याः कृतेभर्तश्समंसुखं न भवति, न पतिव्रता स्त्री स्वस्य भर्तारंविनाजीवितुं शक्यते।

हरणं च परस्तानांपरदाराभिमर्शनम्।
सुहृदश्चपरित्यागस्त्रयोदोषाः भयावहाः।।

महाभारतम्.उद्योगपर्वम्.33/65

अपरजनानांधनस्य हरणम्, परदारेषुसंसर्गः, स्वमित्रस्य परित्यागः एते त्रयः दोषाः भयंकराः भवन्ति।

अर्थागमोनित्यमरोगिता च,
प्रिया च भार्याप्रियवादिनीच।
वश्यश्चपुत्रोऽर्थकरी च विद्या,
शड् जीवलोकस्य सुखानिराजन्।।

महाभारतम्.उद्योगपर्वम्.33/82

नित्यंधनस्यागमनम्, सदैवनिरोगिता, प्रियतमाभार्याउतप्रियवचनतमा, आज्ञांकितः पुत्रः तथाअर्थागमाविद्या एते षड् भूतलोकेसुखं ददन्ति।

शडिमानिविनश्यन्तिमुहूर्तमनवेक्षणात्।
गावः सेवा कृषिर्भार्याविद्यावृषतसंगति।।

महाभारतम्.उद्योगपर्वम्.33 / 86

इमानि षड् मुहूर्तकालमेवनाम एकस्यां घटिकायां न पश्येत् चेत् तस्य नाशोभवति।तानि यथा–गावः, शुश्रूषा, कृषिः, भार्या, विद्यातथा शूद्रेण सह मेलनम्।

आपदर्थेधनंरक्षेद् दारान् रक्षेद् धनैरपि।
आत्मानंसततंरक्षेद् दारैरपिधनैरपि।।

महाभारतम्.उद्योगपर्वम्.37 / 18

विपत्यां ( विपत्यर्थे) धनं रक्षेत्, स्वपत्निंधनेन रक्षेत् किन्तु आत्मानं(स्वं) धनेनपत्न्या च रक्षितव्यम्।

पुजनीयामहाभागाः पुज्याश्चगृहदीप्तयः।
स्त्रियःश्रियोगृहस्थोक्तास्तस्माद् रक्ष्या विशेषतः।।

महाभारतम्.उद्योगपर्वम्.38 / 11

गृहस्य लक्ष्मीस्वरुपाः स्त्रियः भवन्ति, स्त्रियः गृहदीप्तयः, स्त्रियः गृहस्य शोभा, गृहस्यापवित्रता, गृहस्य आदरणीया एतत् सर्वं स्त्रिषुस्वाभाविकंतिष्ठति नाम स्त्रियः नैकगुणान् धारयन्ति।

नाग्निस्तृप्यतिकाष्ठानांनापगानांमहोदधिः।
नान्तकः सर्वभूतानां न पुंसांवामलोचना।।

महाभारतम्.उद्योगपर्वम्.40 / 7

अग्निः इन्धनेन, जलधिः नदिभिः, मृत्युः सर्वैः प्राणिभिः तथाव्यभिचारिण्यः स्त्रियः पुरुषैः न कदापिसन्तोषम् अनुभवन्ति।

प्राणत्राणेऽनश्तंवाच्यमात्मनो वा परस्य च।
गुर्वर्थे स्त्रीषुचैवस्याद् विवाहकरणेषुच।।

महाभारतम्.शान्तिपर्वम्.35 / 25

स्वस्य वा परस्य प्राणरक्षार्थम्, गुरोः कृते, एकान्तेनार्या सह विनोदे एवं विवाहप्रसङ्गे अनश्तंवाचम् उच्चार्यतेतदा न कदापिवाचः पापप्रदाः भवन्ति।

स्त्रियास्तथापचारिण्या निष्कृतिः स्याददूषिका।
अपिसापूयतेतेन न तुभर्ताप्रदुष्यति।।

महाभारतम्.शान्तिपर्वम्.34 / 33

यदिव्यभिचारिणांस्त्रिणांतिरस्कारः भवेत् चेत् न कोऽपिदाषः,तेनतिरस्कारेणसापवित्रा उततस्याः भर्तादोषरहितोभवति।

नारीणांव्यभिचाराच्चअन्यायाच्चमहीक्षिताम् ।
विप्राणांकर्मदोषाच्चप्रजानांजायतेभयम् ।।

महाभारतम्.शान्तिपर्वम्.77/29

स्त्रीणां (प्रमदाजनानाम्) व्यभिचारात्, राज्ञां (भूपतिनाम्) अन्यायात् (अनभिज्ञतया), ब्राह्मणानांकर्मोचितं न करणेन वा कर्मदोषात् प्रायः सर्वेजनाः भीताः भवन्ति।

साभार्या या प्रिय ब्रूते स पुत्रो यत्र निर्वृत्तिः।
तन्मित्रं यत्र विश्वासः स देशो यत्र जीव्यते।।

महाभारतम्.शान्तिपर्वम्.137/96

प्रियवचनंब्रूते या सा पत्नी(भार्या) भार्याअर्थात् (भरणयोग्या), सुखं ददातिअसौपुत्रः, विश्वासंसदाधारयतिसैवमित्रः, यत्र आजीविकानिरन्तरंचलतिसेवदेषः।

न च शोचतिनाव्येनस्थाविर्यमपकर्षति।
श्रियाहीनोऽपि योगेहेमम्बेतिप्रतिपद्यते।।

महाभारतम्.शान्तिपर्वम्.मोक्षधर्मपर्वम्.266/27

यस्य जननीभवति, तस्य कृतेकापिचिन्ता न भवति, तस्य समीपेजरावस्थानागच्छति, ये स्वं मातरंस्तुन्वन्ति, तेनिर्धनाः स्युः चेदपिअन्नपूर्णायाः समीपेगच्छन्ति।

नास्तिमातृसमाछायानास्तिमातृसमागतिः।
नास्तिमातृसमं त्राणंनास्तिमातृसमाप्रिया।।

महाभारतम्.शान्तिपर्वम्.मोक्षधर्मपर्वम्.266/31

मातृसमानंविश्वे न कोऽपिसंरक्षकः भवति, मातृसमानं न कापिसहायिकावर्तते, मातृसमानं न कोऽपिसंरक्षणंवदधाति, पुत्राणां कृते न कोऽपिमातृसमांप्रियाभवेत्।

वसामि स्त्रीषुकान्तासुदेवद्विजपरासुच।
विशुद्धगृहभाण्डासुगोधान्याभिरतासु ।।

महाभारतम्.अनुशासनपर्वम्.दानधर्मम्.11/11

याकान्तास्त्रिगुणैः मुक्ताः भूत्वादेवब्राह्मणादिनाम् अपचितिंविदधति, गृहस्य भाण्डादिकान् स्वच्छंकुर्वती, गौसेवातथाधान्याभिरताभवति, तस्यांसाक्षात् लक्ष्मीः निवसति।

आकरस्थं यथारत्नंसर्वकामफलोपगम्।
तथाकन्यामहालक्ष्मीः सर्वलोकस्य मङ्गलम्।।

महाभारतम्.अनुशासनपर्वम्.दानधर्मम्.11/

यथाआकरस्थंरत्नंसर्वकामनानांपूर्तिः करोति,तथैवदाक्षिणात्य कन्यामहालक्ष्मीवत्(स्वरूपा इव) संपूर्णविश्वस्य कल्याणंकरोति।

साध्वीकुलंवर्धयति, साध्वीपुष्टिर्गृहेपरा।
साध्वीलक्ष्मी रतिः साक्षात् प्रतिष्ठासंततिस्तथा।।

महाभारतम्.अनुशासनपर्वम्.दानधर्मम्.11 /

(साध्वी स्त्री) कल्याणमयी स्त्री कुलवृद्धिं करोति, साध्वी स्त्री गृहंपोशयति, साध्वी स्त्री साक्षात् लक्ष्मीस्वरुपाभवति, सारतिः साक्षात्, तयाइवसन्तानपरमस्याः रक्षणम्,कुलस्य प्रतिष्ठा च वर्धते।

कुलिना रूपवत्यश्च नाथवत्यश्चयोषितः।
मर्यादासु न तिष्ठन्ति स दोषः स्त्रीषुनारदः।।

महाभारतम्.अनुशासनपर्वम्.दानधर्मम्.38 / 11

येस्त्रियः तादृशाः सन्ति यथा–उत्तमकुलजाः, रुपवत्यः, सनाथाः, युवत्यः अपिमर्यादायाम् एव भवेत् इतिकठीनंवर्तते। आसाम् ये दोशाः भवन्ति यत् दृ कदा, कस्याम् प्रवृत्तौ सङ्गं धारयन्ति।

अनर्थित्वान्मनुश्याणांभयात् परिजनस्य च।
मर्यादायाममर्यादास्त्रियस्तिष्ठन्तिभर्तृषु।।

महाभारतम्.अनुशासनपर्वम्.दानधर्मम्.38 / 16

प्रायःस्त्रिषुस्वयंमर्यादिता न भवति, यदासामनुष्याणांमध्येभयात् भवति वा परिजनानांमध्ये वा पतिसमीपंतिष्ठतितदा एव सामर्यादाम् अनुसरति।

यौवनेवर्तमानानां मृष्टाभरणवासस्तम्।
नारीणांस्वैरवृत्तीनांस्पृहयन्तिकुलस्त्रियः।।

महाभारतम्.अनुशासनपर्वम्.दानधर्मम्.38 / 19

यौवनेवर्तमानानांस्वच्छाचारिणां स्त्रीणां, सुन्दरम्, आभूषणं वा वस्त्राणि दृष्ट्वाकुलनार्यः अपितस्याः अनुकरणंकुर्वन्ति।

नाग्निस्तृष्यतिकाष्ठानांनापगानांमहोदधिः।
नान्तकः सर्वभूतानां न पुंसांवानलोचना।।

महाभारतम्.अनुशासनपर्वम्.दानधर्मम्.38 / 25

अग्निः इन्धनेनतृप्ता न भवति, नद्यः(सरितः) समुद्रेणतृप्ता न भवति, मृत्युः सर्वभूतैः तथास्त्रियः पुरुषैः प्रायः तृप्ताः न भवन्ति।

द्विजानां च गुरुणां च महागुरूनश्पादिनाम्।
क्षणात् स्त्रीसङ्गकामोत्या यातनाहोनिरन्तरा।।

महाभारतम्.अनुशासनपर्वम्.दानधर्मम्.40 / 11

स्त्रियः क्षणमात्रस्य सुखेन एव ब्राह्मणस्य कृते, गुरोः कृतेतथाराज्ञः कृतेनिरन्तरा यातनासहनीयाभवति।

न तासांरक्षणं शक्यंकर्तुं पुंसांकथञ्चन।
अपिविश्वकृताताता कृतस्तुपुरूषैरिह।।

महाभारतम्.अनुशासनपर्वम्.दानधर्मम्.40 / 13.14

स्त्रीणांरक्षणस्य विषये यदाचर्चाक्रियतेतदाब्रह्मणाअपि न रक्षा जातातर्हिसामान्य जनस्य का षक्तिः?

धर्ममूलार्थकामानांब्राह्मणानाम् गवामपि।
पतिव्रतानांनारीणांप्रणामंप्रकरोम्यहम्।।

महाभारतम्.अनुशासनपर्वम्.इन्द्रमालतीसंवादः.96

धर्मानुसारम् अर्थस्य उपार्जनं यैः ब्राह्मणैः क्रियतेतान् ब्राह्मणान्, गावः तथापतिव्रतास्त्रियः एतान् सर्वान् देवराजइन्द्रः नित्यंप्रणामंकरोति।

योभर्तावासितातुष्टोभर्तुस्तुष्टा च वासिता।
यस्मिन्नेवंकुले सर्वं कल्याणं तत्र वर्तते।।

महाभारतम्.अनुशासनपर्वम्.दानधर्मम्.122 / 17

यस्मिन् कुलेपतिः स्वपत्न्यासन्तोषम् अनुभवतिपरंपत्नीस्वपत्यासन्तोम् अनुभवति वा प्रसन्नताम् अनुभवति तत्र सदाकल्याणम् एव स्यात्।

स्त्रियश्चैवविशेषेण स्त्रीजनस्य गतिःपरा।
गौर्यां गच्छतिसुश्रोणिलोकेश्वेशागतिः सदा।।

महाभारतम्.अनुशासनपर्वम्.दानधर्मम्.38 / 11

स्त्रियः एव स्त्रीणाम् अनुसरन्ति, स्त्री एव परमागतिः वर्ततेकथनम् इदंविख्याततंतथासर्वेषांकर्णपटेतिष्ठतिसमाजेच।

यानारीप्रयता दक्षा या नारी पुत्रिणी भवेत्।
पतिप्रियापतिप्राणासानारीधर्मभागिनी।।

महाभारतम्.अनुशासनपर्वम्.दानधर्मम्.146 / 45

या स्त्री स्वहृदयंविमलं कृत्वागृहकार्ये दक्षा स्यात्,पुत्रवतीभूत्वास्वपतिंस्निह्यति, स्वपतिम् एवप्राणरूपंस्वीकरोतिसा स्त्री एवधर्मफलस्याधिकारीअस्ति।

ब्राह्मणान् दुर्बलानाथान् दीनान्धकृपणास्तथा।
बिभर्त्यन्नेन या नारीसापतिव्रतभागिनी।।

महाभारतम्.अनुशासनपर्वम्.दानधर्मम्.146 / 52

या स्त्री ब्राह्मणस्य, दुर्बलस्य, अनाथस्य, निर्धनजनस्य, अन्धस्य, कृपणस्य च अन्नेनभरण–पोषणंकरोति, सा स्त्री पातिव्रतधर्मस्य फलंप्राप्नोति।

पतिर्हिदेवोनारीणांपतिर्बन्धुपतर्गतिः।
पत्यासमागतिर्नास्तिदैवतं वा यथापतिः।।

महाभारतम्.अनुशासनपर्वम्.दानधर्मम्.146 / 55

स्त्रीभ्यःपतिः एव देवता, बन्धुः, बान्धवः वा उत्तमगतिः वर्तते। स्त्रियः कृतेपत्युः अपेक्षया न कोऽपिआश्रयोऽस्ति न देवस्वरूपः अन्यःअस्ति।

## उपसंहृति

शास्त्रदृष्ट्या यदा दृश्यतेतदाज्ञायते यद्– ऋषिभिः स्त्रियः न दासीभावः, दुर्बला, गृहकार्येदक्षा इतिगुणैः स्वीकृताः परन्तुपरमपूज्याभावेनऊररीकृता। पुरूषस्य अपेक्षया स्त्री अधिकतयाश्रेष्ठतरामन्यते। देवैः परीक्षा अधिकतया ऋषिणाम्, साधकानाम् तथातपस्वीनां कृता। कस्याश्चित् पतिव्रतायाः स्त्रियः परिक्षणंप्रायशः केनापिअपि कृतं स्यात्। महाभारतेदमयन्त्याः परीक्षणेइन्द्रसूर्याग्निवरूणाः देवाः अपिनिष्फलाः जाताः। अरुन्धत्याः परीक्षणेइन्द्रसूर्याग्नयः अपिविफलाः जाताः। देवीअनसूयायाः परीक्षणे त्रिदेवाः(ब्रह्मा–विष्णु–महेश) एत देवाः समर्थाः न आसन्। देवीपार्वत्याः परीक्षणंशिवंअन्तरेण न केनापि शक्यम्, तत्र पार्वत्याः जयः जातः। सतीत्वम् एव स्त्रियः सौन्दर्यताअस्ति। पतिव्रतायाः व्रतस्य पालनम् एव उत्तमव्रतम् अस्ति। स्त्री अनुरागी, स्नेहमयी, शक्तिमयी शक्तिश्चअस्ति। एभिः उत्तमोत्तमैः गुणैः सम्पन्नाइयं स्त्री शक्तिषुअपिमहाशक्तिः भगवतीमहालक्ष्मी निवासंकरोति। यत्र स्त्रियाः ब्राह्मणपतिवृद्धानांसेवायांसंलग्नाः स्युः, गृहकार्ये याः स्त्रियः निमज्जिताः दृश्यन्ते, धनधान्यादि सङ्ग्रहे याः स्त्रियः तत्पराः अनुभूयन्तेतादृशयः स्त्रीषु अहम्(महालक्ष्मी) निवसामि।

वसामि स्त्रीषुकान्तासुदेवद्विजपरासुच।
विषुद्धंगृहभाण्डासुगोधान्याभिरतासुच।।

महाभारतम्.अनुशासनपर्वम्.दानधर्मम्.11/11

## सन्दर्भितग्रन्था

1 चाणक्यनीति.
2 महाभारतम्.–महर्षिवेदव्यास प्रणित, सन्.2016
3 गीताप्रेसगोरखपुर, गोविन्दभवनकार्यालय, कोलकतासंस्थान, गोरखपुर